# Shri Bala Upachara

# શ્રીબાલૌપચારાઃ

## Document Information

Text title : bAlaupachArAH

File name : bAlaupachArAH.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલૌપચારાઃ

પ્રદક્ષિણં

૧૦. પદે પદે યત્પરિપૂજકેભ્યઃ સદ્યોઽશ્વમેધાદિ ફલં દદાતિ ।
તત્સર્વપાપક્ષયહેતુભૂતં પ્રદક્ષિણં તે પરિતઃ કરોમિ ॥

નમસ્કારઃ

૧૦. રક્તોત્પલારક્તલતાપ્રભાભ્યાં ધ્વજોર્ધ્વરેખાકુલિશાઙ્કિતાભ્યામ્ ।
અશેષવૃન્દારકવન્દિતાભ્યાં નમો ભવાનીપદપઙ્કજાભ્યામ્ ॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુ તે ॥

શરણાગતદીનાર્તપરિત્રાણ પરાયણે ।
સર્વસ્યાર્તિહરે દેવિ નારાયણિ નમોઽસ્તુ તે ॥

આત્માર્પણં

૧૦. વિજ્ઞપ્તીરવધેહિ મે સુમહતા યત્નેન તે સન્નિધિં
પ્રાપ્તં મામિહ કાન્દિશીકમધુના માતર્ન દૂરીકુરુ ।
ચિત્તં ત્વત્પદભાવને વ્યભિચરેદ્દૃગ્વાક્ ચ મે જાતુ ચેત્
તત્સૌમ્યે સ્વગુણૈર્બધાન ન યથા ભૂયો વિનિર્ગચ્છતિ ॥

ત્વત્પ્રસૂતસ્ત્વદાજ્ઞપ્તસ્ત્વદ્દાસસ્ત્વત્પરાયણઃ ।
ત્વન્નામચિન્તનપરસ્ત્વદર્થેઽહં નિયોજિતઃ ॥

ત્વયાઽઽર્જિતમિદં સર્વં તવ સ્વં પરમેશ્વરિ ।
ત્વદધીનં કરોમીહ ત્વદર્થે તન્નિયોજય ।
તવ દેવિ વશે વર્તે તવાજ્ઞામેવ પાલયન્ ॥

ત્વં માતાપિતરૌ ત્વમેવ સુહૃદસ્ત્વં ભ્રાતરસ્ત્વં સખા
ત્વં વિદ્યા ત્વમુદારકીર્તિચરિતં ત્વં ભાગ્યમત્યદ્ભુતમ્ ।
કિં ભૂયઃ સકલં ત્વદીહિતમિતિ જ્ઞાત્વા કૃપાકોમલે

શ્રીવિદ્યેશ્વરી સંપ્રસીદ શરણં માતઃ પરં નાસ્તિ મે ॥

શાન્તિપ્રાર્થના
માઽહં બ્રહ્મ નિરાકુર્યાં મા મા બ્રહ્મ નિરાકરોત્ ।
અનિરાકરણં મેઽસ્તુ અનિરાકરણં મમ ।
સ્વાવિદ્યૈકનિબદ્ધોઽકરવં કર્માણિ મુહ્યમાનઃ સન્ ।
દૈવાદ્વિધૂતબન્ધઃ સ્વાત્મજ્ઞાનાન્મુનિઃ સ્યાં વા ॥

માયાવશેન સુપ્તો મધ્યેઽપશ્યં સહસ્રશઃ સ્વપ્નાન્ ।
દેશિકવચઃ પ્રબુદ્ધો દીવ્યેયં મોદવારિધૌ કિં વા ॥

જનિવિપરીતક્રમતો બુદ્ધ્યા પ્રવિલાપ્ય પઞ્ચભૂતાનિ ।
પરિશિષ્ટમાત્મતત્ત્વં પશ્યેયં વા મુનિઃ શાન્તઃ ॥

જગદખિલમિદમસારં માયિકમેવેતિ મનસિ મનનેન ।
પર્યટનપાટિતાશઃ પ્રગલિતમદમત્સરઃ સ્યાં વા ॥

ત્વમહમભિમાનવિહીનો મોદિતનાનાજનાચારઃ ।
બાલાચરિતઃ સ્યાં વા વિમલસુખામ્ભોનિધૌ મગ્નઃ ॥

અવધૂતકર્મજાલો જડબધિરાન્ધોપમાચારઃ ।
આત્મારામો યતવાગકુતશ્ચનવસતિરાસીય ॥

ચપલં મનઃકુરઙ્ગં ચારુ નિગૃહ્ણન્વિમર્શવાગુરયા ।
નિગમારણ્યવિહારશ્રાન્તં શાન્તં વિદધ્યાં વા ॥

સન્ત્યજ્ય શાસ્ત્રવાર્તાઃ સંવ્યવહારં ચ લૌકિકં ત્યક્ત્વા ।
અન્તરનુસન્દધન્મનું તે સ્યાં વા નિષ્કમ્પદીપવદ્યોગી ॥

જાત્યભિમાનવિહીનો જન્તુષુ સર્વત્ર પૂર્ણતાં પશ્યન્ ।
ભૂતં ભાવિ ચ ન વિદન્ નિર્મૃષ્ટાશેષવિષયેહઃ ॥

ત્યજતશ્ચ ન સમ્પન્નં નાસમ્પન્નં ચ વાઞ્છતઃ ક્વાપિ ।
તૃપ્તિમનુત્તમસીમાં લબ્ધવતઃ કિં લભેય પદમ્ ॥

પૂજાસમર્પણં
૧૦ અથ મણિમયમઞ્ચકાભિરામે કનકમયવિતાનરાજમાને ।
પ્રસરદગરુધૂપધૂપિતેઽસ્મિન્ ભગવતિ ભવનેઽસ્તુ તે નિવાસઃ ॥

૧૦ મુક્તાકુન્દેન્દુગૌરાં મણિમયમકુટાં રત્નતાટઙ્કયુક્તાં

અક્ષસ્રક્પુસ્તહસ્તામભયવરકરાં ચન્દ્રચૂડાં ત્રિણેત્રામ્ ।
નાનાલઙ્કારયુક્તાં સુરમકુટમણિદ્યોતિતસ્વર્ણપીઠાં
સાનન્દાં સુપ્રસન્નાં ત્રિભુવનજનનીં ચેતસા ચિન્તયામિ ॥

૧૦ એષા ભક્ત્યા તવ વિરચિતા યા મયા દેવિ પૂજા
સ્વીકૃત્યૈનાં સપદિ સકલાન્મેઽપરાધાન્ ક્ષમસ્વ ।
ન્યૂનં યત્તત્તવ કરુણયા પૂર્ણતામેતુ સદ્યઃ
સાનન્દં મે હૃદયકમલે તેઽસ્તુ નિત્યં નિવાસઃ ॥

સર્વા આવરણદેવતા મન્ત્રદેવતાશ્ચ દેવ્યઙ્ગે વિલીના ભાવયે ।
દેવી જ્યોતિર્મયી ચિન્મયી ભાતિ । લમ્બીજા પૃથિવી ગન્ધં સમર્પયતિ ।
હમ્બીજ આકાશઃ પુષ્પાણિ સમર્પયતિ । યમ્બીજો વાયુર્ધૂપમાઘ્રાપયતિ ।
રં બીજોઽગ્નિઃ દીપં દર્શયતિ । વં બીજો વરુણોઽમૃતોપહારં નિવેદયતિ ।
દેવ્યાઃ પાદતલે નિવિષ્ટઃ પુષ્પાઞ્જલિં સમર્પયામિ । દેવીં સંવિન્મયીં
હૃદયં નયામિ (ખેચર્યા) । સંવિદાત્મરૂપિણીં ભાવયે ।
જપસમર્પણં વક્રતુણ્ડાદીનાં ષડઙ્ગન્યાસઃ । દિગ્બન્ધઃ । ધ્યાનમ્ ।
મન્ત્રજપઃ । ષડઙ્ગન્યાસઃ । દિગ્વિમોકઃ । લમિત્યાદિ પઞ્ચપૂજા ।
ગુહ્યાતિગુહ્યગોપ્ત્રી ત્વં ગૃહાણાત્મકૃતં જપમ્ ।
સિદ્ધિર્ભવતુ દેવેશિ ત્વત્પ્રસાદાન્મયિ સ્થિરા ॥

દેવ્યા હસ્તે જપં સમર્પયેત્ ।
કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાત્મના વા પ્રકૃતિઃસ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ।
ૐ તત્ સત્ । બ્રહ્માર્પણમસ્તુ ॥

ઇતિ શ્રીબાલૌપચારાઃ સમાપ્તાઃ ।

Proofread by PSA Easwaran

*Shri Bala Upachara*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*